International Journal of Multidisciplinary Trends

**E-ISSN:** 2709-9369
**P-ISSN:** 2709-9350
www.multisubjectjournal.com
IJMT 2022; 4(1): 137-143
Received: 09-10-2021
Accepted: 27-11-2021

**डॉ. सन्तोष कुमार झा**
सहायकाचार्य, बालाजी कॉलेज ऑफफ एजुकेशन, फफरीदाबाद, हरियाणा, भारत

**Corresponding Author:**
**डॉ. सन्तोष कुमार झा**
सहायकाचार्य, बालाजी कॉलेज ऑफफ एजुकेशन, फफरीदाबाद, हरियाणा, भारत

# शिक्षाशास्त्रानुसारं व्यक्तित्वम्

डॉ. सन्तोष कुमार झा

सारांश
व्यक्तित्वे एकस्य मनुष्यस्य न केवलं शारीरिकानां मानसिकानां वा गुणानामपितु तस्य सामाजिकगुणानां समावेशः भवति मनोवैज्ञानिकानां कथनमस्ति यत् व्यक्तित्वं मानवीयगुणानां लक्षणानां क्षमतानां विशेषतानाञ्च संगठितान्विति अस्ति। आधुनिकमनोवैज्ञानिकाः व्यक्तित्वं सङ्घठितान्वितिरूपेण स्वीकृत्य गतिशीलसङ्घठनस्य एकीकरणस्य च प्रक्रियारूपेण स्वीकुर्वन्ति।
व्यक्तित्वशब्दः आंग्लभाषायाः पर्सनैलिटीशब्दस्य रूपान्तरं वर्तते। आंग्लभाषायाः अस्य शब्दस्योत्पत्तिः यूनानीभाषायाः 'पर्सोना'शब्दात् अभवत्। अस्यामभिप्रायः अस्ति 'यवनिका'।
यूनानीजनाः अभिनयकाले वास्तविकस्वरूपं गोपयितुं रंगभूमौ येनां यवनिका-दास-विदूषक-नर्तकीनामभिनयं कुर्वन्ति स्म। अभिनयकर्ता यस्य पात्ररूपे अभिनयकर्तुं वाञ्छन्ति स्म तदनुसारं यवनिकां धारयन्ति स्म।
भारतीयमनोविज्ञाने व्यक्तित्वस्य सिद्धान्तानां विकास उपनिषदि, सांख्ययोगतन्त्रेषु च विस्तृतरूपेण प्राप्यते। एवम्भूतस्य सिद्धान्तस्य उल्लेखः भगवद्गीतायामपि प्राप्यते। भारतीयमनोविज्ञाने व्यक्तित्वं जीवात्मा इत्युच्यते। अयं सम्प्रत्ययः व्यक्तित्वस्य मनोदैहिकसंरचनायाः संबंधो नास्ति अपितु तस्य नैतिक, आध्यात्मिकतत्वैः सम्बन्धितमस्ति। प्रत्येकस्य जनस्य अन्तःकरणे जीवात्मा तिष्ठति। यः व्यक्तौ सर्वेषां दैहिकमानसिकसंरचनानां परिवर्तनेषु स्वमौलिकतां स्थापयति। यन्मानवः स्वचिन्तन-अनुभव-अभियोग्यता-क्षमता-चारित्रादिगुणानां समाहारेण किञ्चित् कर्तुं पारयति। स आत्मनिष्ठः सन् समाजे स्वव्यक्तित्वस्य निर्माणं करोति। अतोऽत्र किं नाम व्यक्तित्वम् ? तस्य लक्षणानि, परिभाषा तथा च कस्मै कृते आवश्यकमित्यादीनां विमर्शोऽस्मिन् शोधपत्रे अग्रे भविष्यतीति शम्।

कुटज़ब्दः व्यक्तित्वम्, चरित्रम्, मानवीयगुणाः, प्राचीनपद्धतिः, मनोविज्ञानञ्चेति।

## प्रस्तावना

साधारणभाषायां व्यक्तित्वशब्दस्य प्रयोगः शारीरिकरचनायाः सौन्दर्यस्य च कृते क्रियते। प्रायः श्रुयते यत् अस्य मानवस्य व्यक्तित्वमतिसुन्दरमुपस्थितिः मन्यन्ते। यदा अपरे तस्मिन् अनेकास्पष्टगुणानामनिश्चित् लक्षणानां अनिर्णीत- वैशिष्ट्यानाञ्च दुर्बोधसंग्रहं मन्यते।

एतादृश अपि मनुष्याः सन्ति ये स्वीकुर्वन्ति यत् व्यक्तित्वं जन्मनाप्राप्यमानं वस्त्वस्ति। अस्मिन् वातावरणस्य कश्चिदपि प्रभावः न भवति। यच्च मनुष्यानां कार्येषु रमते। यथा - सामान्यमानवानां व्यक्तित्वसम्बद्धाः विविधाः धारणास्सन्ति तथैव विदुषां मनोवैानिकानाञ्च सन्ति। साधारणतया एतत् स्वीक्रियते यत् व्यक्तित्वं विचित्रं जटिलं व्याख्यातः परम अस्ति।

व्यक्तित्वे एकस्य मनुष्यस्य न केवलं शारीरिकानां मानसिकानां वा गुणानामपितु तस्य सामाजिकगुणानां समावेशः भवति मनोवैज्ञानिकानां कथनमस्ति यत् व्यक्तित्वं मानवीयगुणानां लक्षणानां क्षमतानां विशेषतानाञ्च संगठितान्विति अस्ति। आधुनिकमनोवैज्ञानिकाः व्यक्तित्वं सङ्घठितान्वितिरूपेण स्वीकृत्य गतिशीलसङ्घठनस्य एकीकरणस्य च प्रक्रियारूपेण स्वीकुर्वन्ति।

व्यक्तित्वशब्दः आंग्लभाषायाः पर्सनैलिटीशब्दस्य रूपान्तरं वर्तते। आंग्लभाषायाः अस्य शब्दस्योत्पत्तिः यूनानीभाषायाः 'पर्सोना'शब्दात् अभवत्। अस्यामभिप्रायः अस्ति 'यवनिका'।

यूनानीजनाः अभिनयकाले वास्तविकस्वरूपं गोपयितुं रंगभूमौ येनां यवनिका-दास-विदूषक-नर्तकीनामभिनयं कुर्वन्ति स्म। अभिनयकर्ता यस्य पात्ररूपे अभिनयकर्तुं वाञ्छन्ति स्म तदनुसारं यवनिकां धारयन्ति स्म।

भारतीयमतम्

भारतीयमनोविज्ञाने व्यक्तित्वस्य सिद्धान्तानां विकास उपनिषदि, सांख्ययोगतन्त्रेषु च विस्तृतरूपेण प्राप्यते। एवम्भूतस्य सिद्धान्तस्य उल्लेखः भगवद्गीतायामपि प्राप्यते। भारतीयमनोविज्ञाने व्यक्तित्वं जीवात्मा इत्युच्यते। अयं सम्प्रत्ययः व्यक्तित्वस्य मनोदैहिकसंरचनायाः संबंधो नास्ति अपितु तस्य नैतिक, आध्यात्मिकतत्वैः सम्बन्धितमस्ति। प्रत्येकस्य जनस्य अन्तःकरणे जीवात्मा तिष्ठति। यः व्यक्तौ सर्वेषां दैहिकमानसिकसंरचनानां परिवर्तनेषु स्वमौलिकतां स्थापयति। तस्मात् कारणात् सम्पूर्णव्यक्तित्वमाध्यात्मिकात्माभिव्यक्तेः च क्रियाणामिव कार्यं करोति। यस्य संक्षिप्तविवरणमित्थं प्रकारेण अस्ति।

- उपनिषत्सु व्यक्तित्वस्य केन्द्रं जीवात्मा स्वीकृतम्। अस्मिन् चेतना पुरुषरूपेण स्वीकृता यस्य च पञ्चकोषः अन्नमयकोषः, प्राणमयकोषः, मनोमयकोषः, विज्ञानमयकोषः, आनन्दमयकोषश्च वर्तन्ते। इतोऽपि अत्र व्यक्तित्वस्य चत्वारः स्तरः जाग्रतावस्था, स्वप्नावस्था, सुषुप्तावस्था, तुर्यावस्था च।
- सांख्यसिद्धान्ते व्यक्तित्वस्य एका तात्विकी व्याख्या प्रस्तुतास्ति। अस्मिन् सिद्धान्ते मानवस्य व्यक्तित्वं पुरुष-प्रकृतयोः आन्तरिकक्रियायाः परिणामः कथितः। जीवः अनयोः मेलनेन निर्मितो भवति। अस्मिन् सिद्धान्ते व्यक्तित्वस्य त्रयोदशाङ्गानि दशबाह्येन्द्रियाणि सन्ति। व्यक्तित्वस्य त्रीणि आन्तरिकाङ्गानि मनः, अहङ्कारः, बुद्धिश्च। अस्य सिद्धान्तानुसारं जीवात्मनि स्थूलसूक्ष्मभेदेन वस्तुद्वयं विद्यते। अस्मिन् सिद्धान्ते व्यक्तित्वस्य त्रयोः गुणाः सत्वः, रजः, तमसश्च। येषां प्रबलतया व्यक्तित्वस्य चित्तवृत्तेः निर्धारणं भवति।
- योगसिद्धान्तः व्यक्तित्वस्य विशेषरूपेण महर्षिपतञ्जलेः प्रसिद्धः। अस्यानुसारं व्यक्तित्वं बहु-आयामी संरचना स्वीक्रियते अत्र चेतनात् पृथक् उपचेतनमपि महत्त्वरूपेण स्वीक्रियते। प्रयोगसिद्धान्तस्य मान्यता इयमस्ति यत् यदा आत्मनः अचेतनस्य प्रभावेण मुक्तो भवति तदा स स्वमौलिकावस्थां प्राप्नोति। योगस्य मुख्यं कार्यं प्रकृतेः बन्धनात् आत्मनः मुक्तिः वर्तते। एवं तदेव भवितुं शक्यते। तदा मनः स्थिरतामधिगच्छति। योगस्योद्देश्यं सम्पूर्णव्यक्तित्वस्य विकासो वर्तते यस्मिन् अचेतनाभिप्रेरणां किमपि स्थानं नास्ति। एवं सम्पूर्णव्यक्तित्वस्य विकासाय अष्टाङ्गविधेः निरूपणं तत्र वर्तते। तानि च अष्टाङ्गानि यमनियमासनप्राणायामप्रत्याहार- धारणाध्यानसमाधयः।
- अभिधम्मसिद्धान्ते सम्पूर्णव्यक्तित्वस्य आदर्शप्रकारस्य वर्णनमायाति। यस्मिन् मनसः कार्येषु व्यक्तित्वस्य अध्ययनसम्बन्ध अचेतनसदृशानां सम्प्रत्ययानां घटनाक्रमः दृश्यते।
- अस्मिन् प्रत्येकमानसिकावस्थायां विशेषतानां समुच्चयः प्राप्यते। यः मानसिककारकरूपेण ज्ञायते। अस्य भागद्वयं वर्तते। तत्राद्यं कुशलकारकम् अस्वस्थकरकारकं विद्यते। मनसः विधिद्वयं वर्तते एकाग्रमननं, सतर्कमननं याभ्यां मानसिक-अवस्थायाः अकुशलकारकाणि समाप्य कुशलकारकाणां विकासः क्रियते। अनेन स्वस्थव्यक्तित्वस्य विकासो भवति य अराहत इति उच्यते।

पाश्चात्यमतम्

पाश्चात्यमतेष्वपि विभिन्नानामुपागमानां सम्बद्धसिद्धान्तानां प्रतिपादनं कृतमस्ति। एतादृशा उपागमं सैद्धान्तिकोपागमित्युच्यते। तत्र यथा-

- मनोविश्लेषणात्मकमुपागमम् - व्यक्तित्वस्याध्ययनात् पूर्णं सर्वप्रथमं? मनोविश्लेषणात्मकमुपागमं भवति। यस्य प्रतिपादनं सिगमण्डफ्रायड- महोदयेन कृतमस्ति। अस्मिन् उपागमे मानव प्रकृतेः आशा-निराशयोः पक्षयोः विषये चर्चा कृतास्ति।
- नवमनोविश्लेषणात्मकोपागमम् - अस्योपागमस्य विकासः द्विधा प्रकारेण दृश्यते। तत्र प्रथमं फ्रायडमहोदयस्य विषये स्वविचारान् अपि च व्यक्तित्वस्य विशेषान् अंशान् व्यक्तित्वान् रूपं प्रस्तौति। अत्र ।कसससमत युंगयोः नाम्नि प्रसिद्धे। द्वितीयं व्यक्तित्वसम्बद्धं तु नास्ति परञ्च फ्रायडमहोदयस्य विचारे संशोधनं कृत्वा उन्नतदृष्ट्या स्वीकृता। यत्र सुल्लिभान-कैटेल-हारनि-मर्रे प्रसिद्धाः।

नवमनोविश्लेषणात्मकमुपागमे बिन्दुद्वयं दृश्यते-

**(i)** मनोविश्लेषणात्मकोपागमे व्यक्तित्वस्य सामाजिककारकेषु तुलनात्मक- रूपेण प्रभावो वर्तते यदा मनोविश्लेषणात्मकोपागमे व्यक्तित्वस्य जैविककारकेषु बलं प्रदीयते।

**(ii)** नवविश्लेषणात्मकोपागमे मानवप्रकृतेः आशावादितायाः विषये प्रभावो लक्ष्यते। अत्र एवं स्वीक्रियते यत् व्यक्तित्वपर्यावरणीया कारकानां प्रतिफलं अधिकं भवति।

- शरीरगठनात्मकोपागमम् - अस्य विशेषता इयमस्ति यत् व्यक्तित्वस्य विकासव्याख्या शरीरस्य संघटनाकारप्रकाराणां चित्तप्रकृतिरूपेण प्राप्यते। अस्मिन् क्रेशमर, शैल्डर इत्यादीनामुल्लेखो वर्तते।
- जीवनावधिः उपागमम् - अस्मिन् व्यक्तित्वस्य व्याख्या जन्मनः मृत्युपर्यन्तं व्यवहारेषु जायमानानां परिवर्तनानां रूपेण क्रियते। व्यक्तित्वस्य सर्वेषां पक्षाणां व्याख्या जन्मनो मृत्युपर्यन्तमष्टावस्थासु वर्तमानं परिवर्तनं समस्याया समाधानरूपेण वा कृतास्ति। अत्र इरिवलुश, इरिक्सनयोः सिद्धान्तस्य व्याख्या अत्र प्रसिद्धाः।
- प्रकारोपागमम् - व्यक्तित्वस्य वर्णनं शास्त्रीयोपागममिदमस्ति। यस्य विभाजनमष्टभागेषु वर्तते। अस्मिन् शैल्डन-क्रैशमहोदयोः सिद्धान्तानां वर्णनं वर्तते।
- शीलगुणोपागमम् - व्यक्तित्वस्य इदमोपागमं बहुदिनात् उपयुक्त व्यक्तित्वं ज्ञातुं स्वीक्रियते। यतोहि इदमुपागमं सरलं, सामान्यबोध्यमस्ति। यथा अस्य नाम्नैव व्यक्तित्वस्य शीलगुणानां व्याख्या प्राप्यते। एतेषु एवं व्याख्या वर्तते यत् व्यक्तिः कथं व्यवहरति तस्य च व्यवहारे कथं परिवर्तनं जायते। अत्र आलपोर्ट-कैटलयोः सिद्धान्ताः प्रमुखाः।
- विमीयोपागमम् - अत्र व्यक्तित्वस्य व्याख्या विमारूपेण अतः व्यक्तिवसम्बद्ध विमा निम्नोच्चरूपेण स्वीक्रियते यथा बहिर्मुखता व्यक्तित्वस्य विमा यस्मिन् कोऽपि व्यक्तिः उच्चः निम्न वा प्राप्ताङ्कं प्राप्तुं शक्नोति। अत्र आइजैन्क,

कोस्टा, मेके इत्यादिभिः प्रतिपादित- पञ्चकारकीयप्रारूपं स्थापितमस्ति।

- सांवृत्तिकोपागमम् - अनेन व्यक्तित्वस्याध्ययनमात्मगतमनु. भूतिषु प्रभावः प्राप्यते। अत्र अध्ययनकर्त्ता धातव्यं यत् व्यक्ति वातावरणं केन प्रकारेण प्रत्यक्षणं करोति।
- संज्ञानात्मकोपागमम् - अस्मिन् व्यक्तित्वाध्ययने चिन्तयते यत् जनाः केन प्रकारेण पर्यावरणमात्मानं च सुरक्षितं स्थापयितुं शक्नुवन्ति। एवं ते केनापि प्रकारेण प्रत्यक्षणं कुर्वन्ति, मूल्याङ्कनं कुर्वन्ति, शिक्षणं, चिन्तनं, निर्णयसामर्थ्यं, समस्याया समाधानं चिन्तयन्ति। अतः मानसिकक्रियाणां तेषां नियन्त्रणं भवति। अस्मिन् उपागमे केलिप्रतिपादितः व्यक्तित्वसिद्धान्तः कुर्टलेविन प्रतिपादितसिद्धान्तश्च प्रसिद्धः।
- व्यवहारात्मकोपागमम् - अस्मिन् उपागमे व्यक्तित्वं प्रति अनुक्रियाणां संग्रहः स्पष्टव्यवहारं प्रकृत्यां मानवस्य स्वीक्रियते। अपरा च व्यक्तित्वस्य वातावरणे वर्तमानपरिस्थितिभिः व्यवहारेषु परिवर्तनं कुर्वन्ति। अत्र Skinner, मिलट, डोलार्डमहोदयानां सिद्धान्ताः प्रसिद्धाः। सिसरीमहोदयेन उल्लिखितोऽर्थः - यथा-यथा कालोऽप्यवर्तत तथा-तथा 'परसोना'शब्दस्यार्थः परिवर्तितो जातः। ईशापूर्वस्यां प्रथमशताब्द्यां रोमदेशस्य प्रसिद्धेन कूटनीतिज्ञेन सिसेरीमहोदयेन अस्य शब्दस्य प्रयोगश्चतुर्षु अर्थेषु कृतः।

1. यथा एको मानोऽपरमिव दृश्यते वस्तुतः स तादृशः न।
2. यत्कार्यं यत् कश्चिज्जीवने करोति यथा दार्शनिकः।
3. व्यक्तिगुणानां संकलनं येन एको मनुष्यः स्वकार्ययोग्यो भवति।
4. वैशिष्ट्य लेखनसमानञ्च तथा लेखनशैल्यां भवति सा तथा त्रयोदश शताब्दिं यावत् 'परसोना' शब्दस्य प्रयोगे विविधेप्यर्थेष्वभवत्। चतुर्दशशताब्द्यां मानवानां मुख्यवैशिष्ट्यानामुल्लेखनाय एकस्य नूतनस्य शब्दस्यावश्यकताया अनुभवं कर्तुं प्रारभत्।

मनशब्देषु

व्यक्तित्वं व्यक्तिपरिधिं वयवहारविधिरुच्याभिवृत्तिक्षमतायोग्यता. कुशलतानां सर्वविशिष्टैकीकरणरूपेण स्वीकर्तुं शक्यते। अधुना शिक्षाशास्त्रिभिः व्यक्तित्वं संघटितान्वितिरूपेण न मत्वा गतिशीलसंगठनेकीकरणयोः प्रक्रिया मन्यते।

व्यक्तित्वस्य लक्षणम्

कस्यचिदपि मनुष्यस्य व्यक्तित्वस्य सम्यक्चित्रवर्णन 'चरित्रवर्णनम्' वा नास्ति सरलं कार्यम्। सरलीकर्तुं मनोवैज्ञानिकैः व्यक्तित्वस्य केचित् गुणाः लक्षणानि च निर्धारितानि। यथा- दयाकठोरतादीनिबुद्धिमतः परोपकारिणः उत्तमव्यक्तित्वस्य लक्षणानि व्यवहारकरणाय निश्चिताः विधयः याः प्रत्येकेशु मानवेषु स्थापिन्यः भवन्ति। उत्तमव्यक्तित्वस्य लक्षणं व्यवहाराणां बहुसंख्यकस्य स्वरूपस्य वर्णनाय स्पष्टाः संक्षिप्ताश्च विधयः सन्ति।

व्यक्तित्वस्य परिभाषा

आधुनिकवैज्ञानिकाः व्यक्तित्वमेकं संघटिता एक्यं न मत्वा गतिशीलस्य संगठनस्य एकीकरणस्य च प्रक्रियां मन्यन्ते।

1. विग एवं हन्टानुसारम् - व्यक्तित्वं च एकस्य व्यक्तेः सम्पूर्ण व्यवहारप्रतिमानं तस्य च विशेषतानां योगमुल्लेखयति।
2. आलपोर्ट - व्यक्तित्वं च नाम व्यक्तौ तन्मनसः शरीरावस्थाः गतिशीलं संगठनमस्ति। यतः तस्य वातावरणेन सह तस्य अद्वितीयं सामञ्जस्य निर्धारयति।
3. ड्रेवरमतानुसारम् - व्यक्तित्वशब्दस्य प्रयोगः व्यक्तेः शारीरिकमानसिक नैतिकसामाजिकगुणानां सुसंगठितस्य गत्यात्मकस्य च संगठनाय क्रियते यत् सः अन्यैः व्यक्तिभिः सह स्वसामाजिकजीवनाय आदानप्रदानञ्च व्यनक्ति।

व्यक्तित्वस्य मापनविधि

1. प्रश्नावलिविधिः
2. जीवनेतिवृत्तविधिः
3. साक्षात्कारविधिः
4. क्रियापरीक्षणविधिः
5. परिस्थितिपरीक्षणविधिः
6. मानदण्डमूल्याङ्कनविधिः
7. व्यक्तित्वपरिसूचीविधिः
8. प्रक्षेपणविधिः

प्रो. आलपोर्ट - व्यक्तित्वविषये विशद्तया प्रकाशं प्रकाशयति। सन् 1933 वर्षे एतदविषये असौ एकमतीव महत्त्वपूर्णं पुस्तकं प्रकाशयामास। सः अन्यैः मनोवैज्ञानिकैः विदिताः व्यक्तित्वस्य परिभाषाः व्याख्याश्च समालोच्य ज्ञापितवान्। यद् इदं व्यक्तित्वपदं पञ्चाशदधिकेषु अर्थेषु प्रयुक्तमस्ति। येन स्वयं तावद् व्यक्तित्वमेव परिभाषितम्-

'व्यक्तित्वं, व्यक्तिभिः सह तादृशस्य मानसिक-शारीरिकसंस्थानस्य गतिशीलसामञ्जनमस्ति, यद् वातावरणे तस्य अद्वितीयं समायोजनं निर्धारयति।

तदेवमेषा परिभाषा स्पष्टयति यद् व्यक्तित्वे शारीरिको मानसिकश्चोभयविधोऽपि पक्षो महत्त्वपूर्णं भवति। किञ्च नेदं केवलं गुणानां समुच्चयविशेष एव अपितु तेषां समन्वयोऽपि विराजते।

1. व्यक्तित्वं जन्मजातार्जितप्रवृत्तियोगरूपश्च विराजते (बैलन्टानमतम्)।
2. व्यक्तित्वमभ्यासस्य तादृशी व्यवस्थानां समन्वयोऽस्ति यद् वातावरणेन सह व्यक्तेः विशिष्टाभियोजनस्य प्रतिनिधित्वं विदधाति (केम्फमतम्)।
3. इदं स्ववातावरणेन सह व्यक्तित्वस्य सामान्यं स्थायी च सामञ्जनस्य विराजते (वोरिंगमतम्)।

4. व्यक्तित्वं नाम कश्यचिद् व्यक्ते: सामञ्जनस्य व्यवहारपद्धते: अभिरुचि: दृष्टिकोणस्य क्षमताया: शैल्याश्च सर्वाधिकं विशिष्टाव्यवस्था विद्यते (मनमतम्)।
5. व्यक्तित्वे भौतिकं, भावात्मकं, बौद्धिकम्, आत्मीयम्, आध्यात्मिकम्, अतिमानसिकञ्च दृढ़सोपानं भवति (अरविन्दमतम्)।
6. व्यक्तित्वं व्यक्ते: सम्पूर्णा: मानसिकीसुव्यवस्था भवति। या हि तस्या: विकासस्य कयाचिदपि अवस्था भवति (वारेनमतम्)।
7. व्यक्तित्वं कस्याश्चिद् व्यक्ते: सम्पूर्णव्यवहारप्रतिमानस्य तद्वैशिष्ट्यानां चोल्लेखं विद्धाति (विग हण्टयोर्मतम्)।
8. व्यक्तित्वं समाजेन मान्यानामन्यानाञ्च गुणानां सन्तुलनमस्ति (रैक्सरोकमतम्)।
9. व्यक्तेर्व्यक्तित्वं नाम साकल्येन तस्य प्रतिक्रियाणां प्रतिक्रियाया: आवश्यकतानाञ्च तादृशी व्यवस्था या सामाजिकै: प्राणिभि आकल्प्यते। इदं व्यक्तित्वस्य व्यवहाराणामेकं समायोजितं सङ्कलनं विद्यते। यद्धि व्यक्ति: स्वीयसामाजिकव्यवस्थापनाय विद्धाति (डेशीलमतम्)।
10. व्यक्तित्वशब्दस्य प्रयोगो व्यक्ते: शारीरिक-मानसिक-नैतिक-सामाजिक-गुणानां सुव्यवस्थितगत्यात्मकसामञ्जनाय विधीयते। यद्धि असौ अन्यव्यक्तिभि: समं स्वसामाजिकजीवनस्य आदानप्रदानवसरे व्यक्तीकरोति (ड्रेवरमतम्)।
11. व्यक्तित्वं व्यक्ते: समस्तै: जन्मजासंस्थानै: आवेगै: प्रवृत्तिभि: अनुभवैश्च अर्जितानां संस्काराणां प्रवृत्तीनाञ्च योगो विराजते (प्रिंसमार्टर्नमतम्)।
12. व्यक्तित्वं मानवानां स्वभावनां दृष्टिकोणानां लक्षणानां च समन्वयोऽस्ति। किञ्च तत् प्राणिशास्त्रीय-सामाजिक-सांस्कृतिककार्याणां संयुक्तकार्यात् समुत्पद्यते (बीजेन्स एवं बीजेन्स मतम्)।

व्यक्तित्वस्य सिद्धान्त

व्यक्तित्वस्य प्रकृतिं स्पष्टयितुं मनोवैज्ञानिक: व्यक्तित्वस्य सम्बन्धे अनेके सिद्धान्त: प्रतिपादितवान्। अधोलिखितास्सन्ति –

1. मनोविश्लेषणात्मकसिद्धान्त

अस्य सिद्धान्तस्य प्रवर्तक: सिग्मण्डफ्रायडमहोदयोऽस्ति। अस्य सिद्धान्तस्य द्वौ प्रमुखपत्ययौ स्त:। 1. अचेतन मन:। 2. इदमहमत्यहं च। फ्रायडमहोदय: 'अचेतनमनसम्' महत्त्वपूर्णं स्वीकरोति। फ्रायडमतानुसारेण अचेतनमन: विविधाज्ञात: परञ्च शक्तिशालीजीवन्तयो: शक्तीनां सञ्चयो भवति य: व्यक्ते: चेतनव्यवहारनियन्त्रयति।

फ्रायडमहोदयेन व्यक्तित्वस्य संरचनानां 'इदमहं तथा च अत्यहं' इति त्रय: घटकं विशेषरूपेन महत्त्वेन दत्तवान्। तस्यानुसारेण यदि इमे त्रय: घटका: सुसंगठितसमस्तरसत्वेन कार्यं करोति तर्हि व्यक्ति: स्ववातावरणेन सह प्रभावशालिरूपेण समायोजनं करोति तथा च एतादृश: व्यक्ति: सुसमायोजित: व्यक्ति: भवति। एतर्दावपरीतं संघर्षस्यावस्थायां व्यक्तिगतसामाजिकयो: क्षेत्र समुचितरूपेण समायोजनकर्तुमसमर्था भवति।

2. शरीररचनासिद्धान्त

अस्य सिद्धान्तस्य प्रवर्तक: शैल्डनमहोदय: (W.H. Sheldon) आसीत्। तेन शरीररचनाया: तथा व्यक्तित्वस्य मध्ये सम्बन्धस्य अध्ययनं क्रियते स्म। निष्कर्षरूपेण प्राप्तं यत् शरीररचनाया: तथा च व्यक्तित्वगुणेषु घनिष्ठ सम्बन्ध: भवति। शरीरमित्याधारे 'शैल्डन' व्यक्तित्वं त्रिषु विभागेषु विभाजित:। 1. गोलाकृति:, 2. आयताकृति:, 3. लम्बाकृति:। गोलाकृतिन: व्यक्ति: प्रायश: भोजनप्रिय: सहनशील: प्रसन्नवदन: च प्रकृते: भवति। लम्बाकृतिन: व्यक्ति: प्राय: स्वल्पवादी एकान्तप्रिय: अल्पनिद्रावान्, एकाकी निष्ठुरश्च प्रकृत: भवति। क्रेचमरेणापि शरीरचनादृष्ट्या व्यक्तिं त्रिषु भागेषु विभाजित:। 1. लम्बकाय:, 2. सुडौलकाय:, 3. गोलकाय:।

3. गुणविशेषकसिद्धान्त: (ज्तंपज जेमवतल)

व्यक्तित्वस्य विशेषणसिद्धान्तस्य प्रतिपादक: 'कैटल' (R.B. CATTELI) महोदय: आसीत्। तेन कारकविश्लेषणात्मक: सांख्यिकीयप्रविधे उपयोगं कृत्वा व्यक्तित्वस्य किञ्चित् सामान्यगुण: ज्ञातवान्। तथा च तन्नाम 'व्यक्तित्वविशेषक:' दत्तवान्। कैटलद्वारा कथितकारस्याभिधानमस्ति धनात्मकचित्र:, संवेगात्मकस्थिता, बुद्धि:, सामाजिकता च।

कैटलमहोदयेन व्यक्तित्वस्य व्याख्यावसरे कथितं यत् व्यक्तित्व: सैव भवति यस्याधारे अनुमीयते यत् दत्तेषु परिस्थितिषु व्यक्ति: केन प्रकारेण व्यवहारं करिष्यति। तस्यानुसारे 'व्यक्तित्वविशेष:' एक: मानसिकसंचरना अस्ति। य: व्यक्ते: व्यवहारप्रक्रियाया: निरन्तरता तथा च नियमितताया: ज्ञातव्यं भवति। कैटलमहोदयस्य विश्वासमासीत् यत् किञ्चित् सामान्यविशेष: भवति य: सर्वेषु जनेषु सामान्यरूपेण उपस्थितौ भवति। कैटलमहोदयेन विशेषकं द्वयो: प्रकारयो: कथित: – 1. भूस्थित: विशेषक: (SURFACE TRAITS) 2. स्रोतविशेषक: (SOURCE TRAITS) च। सतहीविशेषक: व्यक्ते अग्रभागे भवति किञ्च स्रोतविशेषक: व्यक्ते: पृष्ठभागे भवति य: अभिव्यक्तव्यवहारस्य निर्धारका: भवन्ति। अतएव स्रोतविशेषकस्य महत्त्वं सतहीविशेषकापेक्षया अत्यधिकं भवति। यथा विदितमस्ति यत् एतद् विश्लेषकस्य ज्ञानाय कैटलमहोदयेन 'कारकविश्लेषणसांख्यिकीयप्रविधे:' प्रयोगं कृतमस्ति।

गुणानां महत्त्वम्

प्रत्येकेषु व्यक्तिषु व्यक्तित्वस्य न्यूनाधिक: गुणा अवश्यमेव भवति। ते गुणा: परस्परं विशिष्टप्रकारेण सम्बन्धितो भूत्वा व्यक्तित्वस्य निर्माणं कुर्वन्ति। एकस्य व्यक्तेश्च अपरेषां भिन्नतां प्रददाति। एतन्नस्ति आवश्यको भजते। तेषु गुणेषु कश्चित् गुण: अदृश्यो भवति कश्चित् च स्थायीरूपं धारयति।

अनेन प्रकारेण एकस्य गुणस्य बहव: अर्था: भवितुं शक्यन्ते। कश्चिदपि व्यक्ते: स्मितयुक्तं मुखं तस्या: स्वाभाविको गुण: तस्या: विशिष्टताया: प्रतीकं तस्या: उत्तमस्वास्थ्यानन्दप्रियतायाश्च द्योतकमस्ति।

निष्कर्षत: वयम् एतद् कथितुं शक्नुम: यत् व्यक्तित्वस्य गुणा: अस्माकमपरान् स्वान् च बोधयितुं सन्ति। व्यक्तित्वस्य गुणा: मानवव्यवहाराणां विधीनां सोपानानां च वर्णनं कुर्वन्ति।

व्यक्तित्वस्य प्रकारा:
व्यक्तित्वस्य वर्गीकरणे मनोवैज्ञानिका: भिन्नत्वेन वर्णिता: सन्ति। साधारणतया अधोलिखितान् मतान् मनोवैज्ञानिका: प्रकटीकुर्वन्ति।

1. शरीररचनाप्रकार:
2. समाजशास्त्रीयप्रकार:
3. मनोवैज्ञानिकप्रकार:

जर्मनविद्वान्क्रेचमर: शरीररचनाधारे व्यक्तित्वस्य त्रय: प्रकारा: विहित:।
1. शरीररचनाधारे
इदृशी व्यक्ति: दुर्बल: हीनस्कन्धस्य भवति। अस्य बाहु दुर्बलो वक्षश्च न्यून: भवति। तस्य मुखस्य रचना कोणिका भवति। स: अन्यस्य आलोचनां कर्तुमुद्धृतो भवति। किन्तु अन्यत: स्वीयालोचनां नहि वाञ्छति।

खेलात्मक:
तादृशव्यक्ते: शरीरं हृष्टं पुष्टं स्वस्थं च भवति। स: पीनवक्षो भवति। स्कन्धौ उन्नतौ पुष्ट: भुज: पुष्टस्नायुतन्त: आकृतिश्च स: अन्यै व्यक्तिभि: सह सामञ्जस्यं चिकीर्षति।

हृष्ट
एतादृशस्य व्यक्ते: शरीरं स्थूलं वशायुक्तश्च भवति। तस्य वक्षो निम्न: उदरश्च अग्रे निस्सृतो आकृतिश्च वर्तुला भवति। स: आनन्दप्रिय: लोकप्रिय: च भवति।

2. समाजशास्त्रीयप्रकार
व्यक्ते: सामाजिकस्य स्थितेश्चाधारे षट्प्रकारा: कथिता:

सैद्धान्तिका
एतादृशी व्यक्ति: व्यवहारस्यापेक्षा सैद्धान्तिका: भवति। दार्शनिका एतादृश एव भवन्ति।

आर्थिक
एतादृशी व्यक्ति: जीवनस्य सर्वेषां वार्ताणामार्थिकदृष्ट्या मूल्याङ्कनं करोति। स: सर्वेषु कार्येषु लाभं वाञ्छति। स: पूर्णरूपेण व्यवहारिक:, धनस्याधिकं महत्त्वं ददाति। व्यापारिण: एतादृश एव भवन्ति।

सामाजिक
अयं व्यक्ते: प्रेमी भवति। स: समाजकल्याणाय सर्वं कर्तुमिच्छति।

राजनैतिक
इदृश: व्यक्ति: ईश्वराद्भीत: आध्यात्मिकतायाञ्च आस्थां दधाति। तत्जीवनं सरलीभवति।

कलात्मक
इदृशां व्यक्ति: प्रत्येकवस्तूनि कलात्मकदृष्ट्यावलोकयति। तस्मिन् कला-सौन्दर्ये च सम्बन्धं स्थापयितुं प्रबला इच्छा भवति। किन्तु स: विश्वसनीयो न भवति।

3. मनोवैज्ञानिकप्रकारा
मनोवैज्ञानिक: मनोवैज्ञानिकलक्षणाधारे व्यक्तित्वस्य वर्गीकरणं कृतवन्त। तेषु जुंग महोदयस्य वर्गीकरणं सर्वमान्यो अस्ति।
क. अन्तर्मुखी
ख. बहिर्मुखी

एताभ्यां द्विविधाभ्यां सह तृतीयोऽप्यन्य एक: प्रकार: तत्र योजिक:। यतोहि सम्पूर्णा मानवजाति: अत्र प्रकारद्वये समावेशयतिं न शक्यते। स च तृतीय: प्रकारोऽस्ति-विकासोन्मुखा।

1. अन्तर्मुखी
अन्तर्मुखीस्ते भवन्ति मनुष्या: येषाभिरुचि: आत्मनि तिष्ठति। स्वयं च जीवनं प्रति सा आन्तरिकरूपेण उन्मुखा भवति। एतेषां विकास: बाह्यपेक्षया आन्तरिकरूपेण अधिको भवति। अन्तर्मुखीव्यक्तीनां वैशिष्ट्यानि इमानि सन्ति-

1. इमे स्वल्पभाषिण:, लज्जाशील:, पुस्तक-पत्र-पत्राकादिषु समाधिकरुचि- शालिनश्च भवन्ति।
2. एतेषां व्यवहार: आज्ञाकारी आशुविचलनशीलश्च भवति।
3. अधिकलोकप्रिया: न भवन्ति।
4. शोभना: लेखका: परं न वक्तारं भवन्ति। अधिकतया मौनमवलम्बन्ते।
5. चिन्ताग्रस्तास्तिष्ठन्ति।
6. स्वभावान आत्मानं यावदेव सीमितान स्थापयन्ति।

2. बहिर्मुखी
बहिर्मुखीस्ते भवति, येषां रुचि: बाह्ये जगति तिष्ठति। बहिर्मुखानां व्यक्तीनां वैशिष्ट्यानि निम्नलिखितानि भवन्ति-

1. कार्येषु सुदृढ़ा: इच्छा, साहसपूर्वकं च कार्यमाचरन्ति।
2. शासनस्वभावशीला:।
3. धाराप्रवाहरूपेण भाषणे पटव: मित्रवद्व्यवहारशीलाश्च भवन्ति।
4. चिन्तामुक्ता: भवन्ति।
5. प्रायो रुढ़िवादिनो भवन्ति।
6. आक्रामका:, अहंवादिन:, अनियन्त्रिताश्च भवन्ति।
7. वातावरणप्रभावेण शीघ्रं प्रभाविता: जायन्ते। एतेषां व्यवहारो न स्वतंत्रा भवति। बहूनां विचारानुसारं एते स्वविचारं निर्मान्ति।

3. विकासोन्मुखी
बहवो जना: एतादृशा: भवन्ति, येषु द्वयोरपि अन्तर्मुख-बाह्यमुखयो: जनयो: गुणा: मिश्रिता: तिष्ठन्ति। इमे एव विकासोन्मुखी: कथ्यन्ते।

गुणानां वितरणम्

व्यक्तित्वस्य गुणा: मानवीयव्यवहारस्य विभिन्नानि स्वरूपाणि समुपवर्णयन्ति। गेरिटस्यानुसारेण 'व्यवहारस्य एषां स्वरूपाणां वर्णनाय आंग्लभाषाया: न्यूनातिन्यूनता 18000 मिता: शब्दा: विशेषणवाचिन: प्रयोक्तुं शक्यन्ते।

मनौवैज्ञानिका एषु गुणेषु द्वादशप्रधानगुणा उक्ता:। एते गुणा: परस्परं स्वतन्त्रा: निश्चिते विपरीते सीमाद्वये समाविष्टा: तिष्ठन्ति। यथा – बुद्धिमान मूर्ख: दयालु: कठोर: इत्यादय:।

वयं वर्डवर्थानुसारेण प्रधानगुणानां समूहात् केषाञ्चित् गुणानां समुल्लेखमत्र विद्धम:। यथा–

| | प्रधान गुणा: | विपरीत गुणा: |
|---|---|---|
| 1. | प्रसन्नचित्त:, मेलनप्रिय: | उदासीन:, एकान्तप्रिय: |
| 2. | बुद्धिमान, विश्वसनीय: | मूर्ख:, अविश्वसनीय: |
| 3. | संवेगात्मक:, स्थिर:, यथार्थवादी | असंवेगात्मक:, अस्थिर:, अयथार्थवादी |
| 4. | अधिकारप्रिय:, आत्मगौरवप्रिय: | आज्ञाकारी आत्मगौरवरहित: |
| 5. | शान्त:, सामाजिक: | उद्विग्न:, एकान्तप्रिय: |
| 6. | भावुक:, कोमलहृदय: | भावनाशून्य:, कठोरहृदय: |
| 7. | शिष्ट:, सौन्दर्यप्रेमी | अशिष्ट:, असत्य: |
| 8. | उत्तरदायी, परिश्रमी | अनत्तरदायी, परायत: |
| 9. | साहसी, निश्चिन्त: | उत्साहहीन:, सावधान: |
| 10. | मेधावी, शीघ्रकारी | अलस:, दीर्घसूत्री |
| 11. | अत्यधिकोत्तेजनशील: अकारणक्रोधी | असहसोजितस्वभाव:, सहनशील: |
| 12. | मैत्रीपूर्ण:, विश्वासकारी | सन्देहशील:, शत्रुतापूर्ण: |

व्यक्तित्वस्य पक्षा

श्रीमता गैरिसन महाशयेन तदन्यैश्च विद्वद्भि: व्यक्तित्वस्य निम्नलिखता: पक्षा: प्रतिपादितास्सन्ति–

1. क्रियात्मकपक्ष

व्यक्तित्वस्येन पक्षेन मानवस्य क्रियाणां सम्बन्धो विराजते। इमा: तस्य भावुकता-शान्ति-विनोदप्रियता-मानसिक-श्रेष्ठताप्रभृतीन् गुणान्ज्ञापयन्ति।

2. सामाजिकपक्ष

व्यक्तित्वस्यायं पक्ष: मानवेषु अन्येषु च जायमानेन प्रभावेण सम्बन्धं विभर्ति। अत्र पक्षे तेषां समेषां तत्त्वानां समावेशो जायते यै: कारणै: मानव: अपरेषामुपरि एकं विशिष्टं प्रभावं समुत्पादयति।

3. कारणसम्बद्धपक्ष

व्यक्तित्वसम्बन्धिन: पक्षस्यास्य सम्बन्ध: मानवस्य सामाजिकानाम् असमाजिकानां कार्याणां कारणै: तत्कार्याणि प्रति लोकानां प्रतिक्रियाभिश्च विलसति। यदि तस्य कार्याणि शोभनानि, तदैव जनास्तं वाञ्छन्ति, स्पृहन्ति च, नान्यथा।

4. अन्यपक्षा

अपरेषु अस्माकं प्रभाव: जीवने जायमानानां वृत्तानां घटनानां च अस्मासु प्रभाव: भावना: अभिवृत्तयश्च व्यक्तित्वस्य अन्ये पक्षा: सन्ति।

निष्कर्षत: गैरिसन: अन्यश्च लिखित: – 'एते सर्वेऽपि पक्षा: महत्त्वपूर्णा: सन्ति। परन्तु एतेषु कश्चिदेक: अथवा सम्मिलितरूपेण सर्वे वा पूर्णव्यक्तित्वस्य वर्णनं कर्तुं नार्हन्ति। व्यक्तित्वं एषां समेषामथवा इतोऽप्यधिकानां च योगरूपमस्ति। इदं तावत् सम्पूर्णा मानव: इति।

व्यक्तित्वस्वरूपे इमे पक्षा: मानवस्य विभिन्नानां गुणानां पक्षाणाञ्चोपरि प्रभावमुत्पादयति। एते पक्षा: व्यक्तित्वस्य समन्वयात्मकस्वरूपोपरि प्रकाशं पातयन्ति। अतएव बीजेन्स एवं वीजेन्स महाशयेनोक्तम्– 'व्यक्तित्वं मनुष्यस्य अभ्यासानां दृष्टीणां वैशिष्ट्यानां समन्वित: रूपमस्ति। एतद् जीवशास्त्रीयानां सामाजिकानां, सांस्कृतिकानां च कारणानां संयुक्तै: कार्यै: समुत्पद्यते' इति।

व्यक्तित्वविकासस्य प्रभावितत्त्वानि

रैक्स-नाइट महोदययो: शब्देषु-मनोविज्ञानस्य सम्बन्ध: व्यक्तित्व-विकासप्रभावकै: तत्त्वैर्विद्यते। एषु कानिचन तत्त्वानि शारीरिकरचनासम्बन्धानि, जन्मजानि, इतरपर्यावरणसम्बन्धीनि च भवन्ति। व्यक्तित्वविकासस्य प्रभावकानि तत्त्वानि वंशानुक्रम-जैविकतत्त्व-शारीरिकरचना-दैहिकप्रवृत्ति-मानसिकयोग्यता-विशिष्टरुचि-भौतिकवातावरण-सामाजिकवातारण-सांस्कृतिकवातावरण-परिवार- विद्यालयश्च सन्ति।

कैटलमतानुसारेण उभयो: विश्लेषणयो: परस्परमान्तरिकसम्बन्ध: अतिजटिलं भवति य: अन्तिममोद्देश्येन सम्बन्धितविश्लेषकस्याधीनं भवति।

माँगसिद्धान्त: (**NEED THEORY**)

अस्य सिद्धान्तस्य प्रतिपादिक: हेनरी ए. मूरे. आसीत्। मूरेमहोदय: व्यक्ते: आन्तरिकमांगस्याधारे व्यक्तित्वं स्पष्टीकृत:। तेन कथितं यत् व्यक्ति: यस्मिन् वातावरणे निवसति तस्य वातावरणप्रभावस्य समग्ररूपं तस्याभ्यन्तरे किञ्चित् इच्छा उत्पन्नं कुर्वन्ति तथा च अयमेवेच्छा व्यक्तिना कृतं व्यवहारं निर्धारयति। मूरेमहोदय एतादृश: चत्वारिंशत् ईच्छाया: ज्ञात: यस्याभिधानं (व्यक्तित्वमांग) अस्ति। अस्मिन् सम्प्राप्ते: इच्छा, परोपकारस्य इच्छा स्वायत्ताया: इच्छा प्रमुखत्वेन व्यक्तित्वस्य आवश्यकतास्ति।

मानव: स्वचिन्तन-अनुभव-अभियोग्यता-क्षमता-चारित्रादिगुणानां समाहारेण किञ्चित् कर्त्तुं पारयति। स आत्मनिष्ठ: सन् समाजे स्वव्यक्तित्वस्य निर्माणं करोति। इतिशम्।

सन्दर्भग्रन्था


1 सिंह, अरुण कुमार : शिक्षा मनोविज्ञान भारतीय भवन (P&D) द्वितीय संस्करण, 2003

2 स्किनर, सी. ई. : शिक्षा मनोविज्ञान, आत्माराम एण्ड सन्स, 196

3 स्किनर, सी. ई. : शिक्षा मनोविज्ञान के तत्त्व, उत्तर प्रदेश हिन्दी ग्रन्थ अकादमी, प्रथम संस्करण, 1977

4 स्टीफन्स, जे. एम. : शिक्षा मनोविज्ञान, हरियाणा ग्रन्थ अकादमी, प्रथम हिन्दी संस्करण, 1972

5 सुखिया एस. पी. एवं मेहरोत्रा : शैक्षिक अनुसन्धान के मूल तत्त्व, विनोद पुस्तक मन्दिर आगरा, 1970

6 त्रिपाठी, जयगोपाल : मनोवैज्ञानिक अनुसन्धान पद्धतियाँ, विनोद पुस्तक मन्दिर आगरा, 1994